**दिनाङ्क :-08.04.2026**

**प्रात: - 06:55**

**ट्रम्प - ईरान**

अमेरिकादेशस्य राष्ट्रपति: डोनाल्डट्रम्प: उक्तवान् यत् यदि Strait of Hormuz इति जलसन्धिद्वारा नौवहन-यातायातस्य अनुमति: प्रदीयते, तर्हि अमेरिका - ईरान- देशयो: मध्ये सप्ताहद्वयं यावत् प्रस्तावितस्य युद्धविरामस्य कृते असौ सहमतिं ददाति। इत: प्राक् ट्रम्प: ईरानं सञ्चेतितवान् यत् यदि तेहराननगरं तस्य याचना: न स्वीकरोति तर्हि असौ होरमुज-जलसन्धे: पुनरुद्धाटनं समेत्य सेतव:, विद्युत् केन्द्राणि सदृशानि महत्वपूर्ण - सौकर्याणि लक्ष्यीकुर्यादिति। तत्रैव ईरानदेशस्य विदेशमन्त्री अब्बास् अराघची घोषणां कृतवान् यत् यदि ईरानदेशस्य विरुद्धम् आक्रमणानि स्थगिता: भविष्यन्ति, तर्हि एव ईरानदेश: युद्धविरामाय स्वसम्मतिं प्रदास्यति।

**ईरान- निर्देश**:

ईरानदेशे द्रुतगत्या परिवर्तित स्थितं दृष्ट्वा विदेश - मन्त्रालयेन भारतीयनागरिकेभ्य: आवगमनं परिहर्तुं निर्देश: प्रदत्त:। अस्मिन् निर्देशे वर्णितम् अस्ति यत् ईरानदेशस्य अन्त: उत वा सीमापारं करणार्थं कामपि यात्रां तेहराननगरे भारतीयदूतावासेन यह निकटसमन्वयेन स्पष्टमार्गदर्शनेन च सहैव करणीयम् इति। तेहराननगरे भारतीयदूतावासेन नागरिकेभ्य: आग्रह: कृत: यत् अग्रिम-अष्टचत्वारिंशत्- होरा: यावत् तत्रैव वसन्तु।

**विधानसभा**

असम - केरलम - पुद्दुचेरी इत्येतेषु नगरेषु विधानसभा- निर्वाचनाय प्रचाराभियानं नैकासां दिनानां व्यस्त- राजनीतिक - कार्यक्रमाणांम् अनन्तरं ह्य: सायं समाप्तम्। असमस्य सर्वेभ्य: षड्विंशत्यधिकैक - विधानसभासनेभ्य: , केरलमराज्यस्य चत्वारिंशदधिकैक - आसनेभ्य: सहैव पुद्दुचेरीनगरस्य त्रिंशत् - आसनेभ्य: मतदानं श्व: एकस्मिन् एव चरणे भविष्यति। ह्य: निर्वाचनप्रचारस्य अन्तिमासु होरासु राजनैतिकदलानां प्रमुखा: नेतार: मतदातृभि: सह सम्पर्कं साधयितुं स्वीय समर्थनस्य आधारं सुदृढीकर्तुं च समन्वितप्रयासान् अकुर्वन् ।

**पश्चिमबङ्गालस्य**

पश्चिमबङ्गालस्य मुख्यनिर्वाचनाधिकारी राज्यस्य कारागारेषु , परिष्कारगृहेषु च कठोर-निरीक्षणाय आदेशं प्रदत्तवान् , येन कारागार परिसरात् निर्वाचनप्रक्रियायां कोऽपि हस्तक्षेप: न भवेदिति।

**एल.पी.जी.**

प्रशासनेन राज्येषु प्रवासिश्रमिकेभ्य: वितरणाय उपलभ्यमानस्य पञ्च - किलोग्राम् - मितस्य मुक्तव्यापारस्य एल.पी.जी. सिलेण्डर् इत्यस्य दैनिक- वितरणं द्विगुणितं कर्तुं निर्णय: कृत:।

ह्य: नवदिल्ल्यां पश्चिमैशियाया: वर्तमानस्थितौ अन्तामन्त्रालयीयं विवरणं सम्बोधयन्ती पेट्रोलियम - प्राकृतिक- वातीन्धन - मन्त्रालस्य संयुक्त - सचिवा सुजाता शर्मा अवदत् यत् एकस्मिन् एव दिने प्राय: पञ्च - किलोग्राम - सिलेण्डर् इत्यस्य विक्रयणं प्राय: एकलक्षं यावत् वर्धितम् , यत् फरवरीमासे प्राय: सप्तसप्ततिसहस्रं सिलेण्डर् इति आसीत्।

**आई.पी.एल.**

आई.पी.एल. क्रिकेट प्रतिस्पर्धायां ह्य: रात्रौ गुवाहाट्यां राजस्थान रॉयल्स दलेन मुम्बई इण्डियन्स् दलं सप्तविंशति - धावनाङ्कै: पराजितम्।

**।।इति वार्ता:।।**